**|| श्री स्वामी समर्थ ||**

---

## || त्रैलोक्य विजय कवचम |

---

देव्युवाच कथिताश्छिन्नमस्ताया याया विद्याः सुगोपिताः।
त्वया नाथेन जीवेश श्रुताश्चाधिगता मया।।
इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितम्।
त्रैलोक्यविजयं नाम कृपया कथ्यतां प्रभो।।

भैरवोवाच शृणु वक्ष्यामि देवेशि सर्वदेव नमस्कृते।
त्रैलोक्यविजयं नाम कवचं सर्वमोहनम्।।
सर्वविद्यामयं साक्षात्सुरासुर जयप्रदम्।
धारणात्पठनादी शस्त्रैलोक्यविजयी विभुः।।
ब्रह्मा नारायणो रुद्रो धारणात्पठनाद्यतः।
कर्ता पाता च संहर्ता भुवनानां सुरेश्वरि।।
न देयं परशिष्येभ्य अभक्तेभ्यो विशेषतः।

देयं शिष्याय भक्ताय प्राणेभ्योऽप्यधिकाय च।।
विनियोग
व्याश्चाच्छन्नमस्तायाः कवचस्य च भैरवः।
ऋषिविराट् छन्दत देवताच्छिन्नमस्तका।

त्रैलोक्यविजये मुक्तौ विनियोगः प्रकातितः
अथ कवचम् ॐ हूं कारो मे शिरः पात छिन्नमस्ता बलप्रदा।
ह्रीं ह्रीं ऐं त्यक्षरी पात भालं वक्त्रं दिगम्बरा।।
0हा हूए दृशौ पातु मुण्डे कर्तधरापि सा।।
सा विद्या प्रणवाद्यन्ता श्रतियुग्मं सदाऽवतु।

नाय हूं फट् स्वाहा च भ्रवादिकम्।।
ध्राण पातु छिन्नमस्ता मुण्डकर्तविधारिणा।
श्रीमाया कूर्चवाग्बीजैर्वज्र वैरोचनीय है।।

बिन्दुनाद समायुक्तं कूर्मबीजं तदनन्तरम्।
नमस्तारायै सकलदुस्तरांस्तारय द्वयम्।।
स्वाहान्तोऽयं भयङ्करी श्रीमद्भुवनतारिणी।
श्यामां द्वादशहस्तां च रक्तवस्त्रां शवासनाम्।।
खड्गकर्तृधरां नित्यां संस्मरेद् हृदयाम्बुजे।
कूर्च नृसिंह क्रों कूर्च लज्जामस्त्रं च कूर्चकम्।।
नारसिंहीति विख्याता श्रीमत्सङ्कटतारिणी।
श्यामां दशभुजां खड्गकर्तृहस्तां शवासनाम्।।
शुक्लवस्त्रां सदा ध्यायेन् मूलाधार निवासिनीम्।
ॐ शिरो मे सततं पातु हस्रौं कुल्लुकतारिणी।।
शिखां मे पातु कलहीं देवी या ब्रह्मतारिणी।
शिरसो दक्षिणे भागे हसस्त्रीं वज्रतारिणी।।
पातु मां वामभागे तु वं सहूं दुर्गतारिणी।
शिरसः पश्चिमे भागे रक्ष फट् उग्रतारिणी।।

षडक्षरी कुल्लुकेशी विजयानन्दतारिणी।
खड्गाम्भोजवराभीतिधारिणी मां सदाऽवतु॥
मणिधरि वज्रिणि ह्रीं हूं त्रीं सर्व वशङ्करि।
प्रतिसरे रक्ष रक्ष मां ह्रीं हूं हूं फट् स्वाहयान्विता॥
शिखाग्रन्थिस्थिताऽवयान्मां देवी श्रीमणितारिणी।
ॐ ह्रीं हूं क्षौं सर्वविजानुत्सादय विदारय हूं फट् स्वाहा।
विजतारा दिक्षु मां पातु सर्वदा॥
ॐ ह्रीं स्त्री आः सुरेखे हूं वज्ररेखे ठः हूं फट् स्वाहा।
पातु भुवि प्रीता मां सुरेखोग्रतारिणी॥
इत्यष्टौ कुल्लुका मंत्रान् विन्यस्य साधकोत्तमः।
चतुरशीतिभेदांस्तान् मूलस्थान् विग्रहे न्यसेत्॥
ॐ शिरो मे ह्रीं स्त्री हूं फट् पातु मां पञ्चतारिणी।
या देव्येकजटा नाम त्रैलोक्ये जाड्यहारिणी॥
नेत्रयोही स्त्री हूं पातु नीला देवी त्रिलोचना।
भाले श्रीं ह्रीं स्त्री हंसः हूं फट् स्वाहा भीमतारिणी॥
ध्रुवोर्मध्यं पातु नित्यं ॐ ह्रीं हंसः सहीं सहूं।
फट् स्वाहा ज्ञानतारा या अज्ञानेन्धनदाहिनी॥
ॐ ह्रीं हंसः श्रीं हंसः स्त्री हूं फट् श्रीं प्राणतारिणी।
पातु मां नासिका मध्ये सर्वापत् क्षयकारिणी॥

यस्याज्ञया मधुमती याति सा साधकालयम।
भूतिन्याद्याश्च डाकिन्यो यक्षिण्याद्याश्च खेचराः
आज्ञा गृह्णन्ति तास्तस्य कवचस्य प्रसादतः।
एतदेव परं ब्रह्मकवचं मन्मुखोदितम्॥

देवीमभ्यर्च्य गन्धाद्यैर्मूलेनैव पठेत्सकृत्।
सम्वत्सर कृतायास्तु पूजायाः फलमाप्नुयात्॥
भूर्जे विलिखितं चैत्तगुटिकां कञ्चनस्थिताम्।
धारयेद्दक्षिणे बाहौ कण्ठे वा यदि वान्यतः॥
सर्वेश्वर्ययुतो भूत्वा त्रैलोक्यं वशमानयेत्।
तस्य गेहे वसेल्लक्ष्मीर्वाणी च वदनाम्बुजे॥
ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रेयान्ति सौम्यताम्।
इदं कवचमज्ञात्वा यो भजेच्छिन्नमस्तकाम्।

सोऽपि शस्त्र प्रहारेण मृत्युमाप्नोति सत्वरम्॥
॥ इति श्रीभैरवतन्त्रे भैरवभैरवीसंवादे त्रैलोक्यविजयं नाम्ना छिन्नमस्ता कवचम्॥

---

॥ श्री गुरुदत्तात्रेयार्पणमस्तु ॥
|| श्री स्वामी समर्थार्पर्ण मस्तु||

---